आकाशवाणी

**दिनाङ्क : - 08/08/2025** **सायम् : - 06:20**

**मुख्यवार्ता:**

- सर्वकारेण **वर्तमानवित्तवर्षाय** प्रधानमन्त्री उज्ज्वला योजना उपभोक्तृभ्यः अनुदान**स्य अनुवर्तनं स्वीकृतम्। अस्मिन्** अनुमानितव्ययः **द्वादश**सहस्रकोटिरूप्यका**णां भविष्यति** ।
- **केन्द्रसर्वकारेण प्राविधि**क-शिक्षा-योजनायां संशोधन-विकासाय च **द्विशताधिकचतुस्**सहस्र कोटि-रूप्यकाणां व्ययस्य आय-**व्या**यिक-साहाय्याय अनुमतिः प्रदत्ता।
- बिहारे विशेषसघनपुनरीक्षणस्य अभ्यासस्य विषये विपक्षीदलानां विरोधानन्तरम् अद्य संसदः द्वयोः सदनयोः कार्यजातं बाधितम्, येन सदनं दिवसाय स्थगितम्।
- भाजपा-**दल**स्य वरिष्ठः नेता तथा **च** केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य बिहारराज्ये निर्वाचक-सूच्यां विशेष-गहन-संशोधनस्य विरोधाय आर्. जे. डी. प्रमुखं लालू-प्रसादं तथा **च** काङ्ग्रेस्-नेतारं राहुलगा**न्धिनं निन्दितवान्**।
- **टेनिस्-क्रीडायाम् अष्टादवर्षीयया कनाडा-देशस्य विक्टोरिया-म्बोको-इत्यनया नेशनल्-बैङ्क-ओपन-क्रीडायां नाओमी ओसाका पराजिता ।**

**मन्त्रिमण्डलम्**

सर्वकारेण वर्तमानवित्तवर्षाय प्रधानमन्त्री उज्ज्वला योजना उपभोक्तृभ्यः अनुदानस्य अनुवर्तनं स्वीकृतम्। अस्मिन् अनुमानितव्ययः द्वादशसहस्रकोटिरूप्यकाणां भविष्यति । अद्य नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आध्यक्ष्ये मन्त्रिमण्डलस्य निर्णयनां विषये सूचयन्, सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् अस्याः योजनायाः अन्तर्गतं त्रयस्त्रिंशल्लक्षाधिक दश कोटिपरिवाराः लाभान्विताः सञ्जाताः । सर्वकारः प्रतिवर्षं नव पुनर्भरणानां कृते प्रति द्विशतग्रामपरिमिताधिकचतुर्दश- किलोग्रामयुताय सिलिण्डर् इत्यस्मै त्रिशतं रूप्यकाणां लक्ष्यीकृतं अनुदानं प्रदास्यति।

आइ. ओ. सी. एल्**.(iocl),** बी. पी. सी. एल्**.(bpcl),** एच. पी. सी. एल्**.(hpcl)** इत्यादीनां सार्वजनिकक्षेत्रस्य तैलविपणन-संस्थानां कृते त्रिंशत्सहस्रकोटिरूप्यकाणां क्षतिपूर्तिः अपि सर्वकारेण अनुमोदितास्ति। सः अवदत् यत्, एल्. पी. जि. इत्यस्य विक्रयणात् प्राप्तानां न्यून-धनलाभानां कृते एतत् उपायं कृतम् अस्ति इति। सः अवदत् यत्, अयं पदक्रमः तैलविपणनसंस्थानां वित्तीयस्वास्थ्यं रक्षयन् वैश्विक-ऊर्जा-विपण्यां उपभोक्तृणाम् अस्थिरतायाः रक्षणाय सर्वकारस्य प्रतिबद्धतां प्रदर्शयति।

श्री वैष्णवः एतदपि सूचितवान् यत् सर्वकारेण बहु-विषयक-शिक्षायाः तथा च प्राविधिक-शिक्षा-योजनायां संशोधन-विकासाय च द्विशताधिकचतुस्सहस्र कोटि-रूप्यकाणां व्ययस्य आय-व्यायिक-साहाय्याय अनुमतिः प्रदत्ता अस्ति इति। सः अवदत् यत्, अस्याः योजनायाः उद्देश्यं प्राविधिकशिक्षायाः गुणवत्तायाः, समानतायाः, प्रशासनस्य च औन्नत्यं वर्तते। सर्वकारेण असम-त्रिपुरा-राज्ययोः कृते विद्यमानस्य केन्द्रीय-क्षेत्रस्य विशेष-विकास-कोषस्य अन्तर्गतं चतुर्णां नूतनानां घटकानाम् अपि अनुमोदना कृता, यस्य आहत्य व्ययः सार्धद्विशताधिकचतुस्सहस्ररूप्यकाणि भविष्यति ।

**सदन-बाधितम्**

बिहारे विशेषसघनपुनरीक्षणस्य अभ्यासस्य विषये विपक्षीदलानां विरोधानन्तरम् अद्य संसदः द्वयोः सदनयोः कार्यजातं बाधितम्, येन सदनं दिवसाय स्थगितम्। लोकसभायां यदा सदनं अपराह्ने त्रिवादने पुनः आरब्धम् तदा विपक्षीय दलानां सांसदाः एसआईआर-विषये कोलाहलेन सह केन्द्रे प्रविष्टवन्तः । अध्यक्षपदाधिकारी विरोधं कुर्वतः सदस्यान् केन्द्रं रिक्तं कृत्वा पुनः स्वपीठं प्रति गन्तुं आग्रहं कृतवान्। केन्द्रीयवित्तमन्त्री निर्मलासीतारामणः पञ्चविंशत्यधिक द्विसहस्रेति आयकरविधेयकं प्रत्यावर्तुं प्रस्तावम् अयच्छत् यत् सदनेन अनुमोदितम्। सदने कोलाहलपूर्ण-दृश्यं निरन्तरं दृष्टवा संसदीयकार्याणां मन्त्री किरेन् रिजिजुः अवदत् यत् शुक्रवासरः निजविधेयकानाम् कृते आरक्षितः अस्ति किन्तु विरोधे संलग्नाः सदस्याः तत् बाधितवन्तः।

**बिहार अमित शाहः**

भाजपा-दलस्य वरिष्ठः नेता तथा च केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य बिहारराज्ये निर्वाचक-सूच्यां विशेष-गहन-संशोधनस्य विरोधाय आर्. जे. डी. प्रमुखं लालू-प्रसादं तथा च काङ्ग्रेस्-नेतारं राहुलगान्धिनं निन्दितवान्। अद्य अपराह्ने सीतामढी-नगरे जनसभां सम्बोधयन्, श्रीशाहः आरोपितवान् यत् एस्.आइ. आर्-पक्षस्य विरोधं कृत्वा एते विपक्षनेतारः मतकोष-राजनीतेः कृते अतिक्रमण-कारिणाम् अनुकूलाः सन्ति इति। सः अवदत् यत् भारतस्य निर्वाचन-आयोगेन आयोजितं एस्.आइ. आर्. स्वस्थ-लोकतन्त्रस्य कृते परिष्कारात्मक- उपायत्वेन अस्ति इति।

**चीन-भारत-एससीओ शिखरसम्मेलनम् :**

चीनदेशेन एकत्रिंशत् अगस्ततः एक सितम्बरपर्यन्तं तियानजिन-नगरे शङ्घाई-सहयोग-सङ्गठनस्य शिखरसम्मेलने भागं ग्रहीतुं प्रधानमन्त्रिणः नरेन्द्रमोदिनः आगामियात्रायाः स्वागतं कृतम् अस्ति। चीनविदेशमन्त्रालयस्य प्रवक्ता गुओ जियाकुन् इत्यनेन उक्तं यत् शिखरसम्मेलनं एकतायाः मित्रतायाः च उपवेशनं भविष्यति, यत्र विंशतितोप्यधिकेभ्यः देशेभ्यः सहभागिता भविष्यति।

**लोकसभा-नड्डाः**

रसायन-उर्वरकमन्त्रिणा जगत प्रकाश नड्डा इत्यनेन उक्तं यत्, उर्वरकाणां तस्करीं, संग्रहणं च स्थगयितुं सर्वकारः प्रतिबद्धः अस्ति। अद्य लोकसभायां प्रश्नकाले पूरकपत्राणां उत्तरं ददता श्रीनड्डा इत्यनेन उक्तं यत्, उर्वरकं आवश्यक-वस्तुरूपेण घोषितम् अस्ति, उर्वरकनियन्त्रणादेशः, एफसीओ पंचाशीत्यधिक ऊनविंशतिशतं तथा च उर्वरक(आन्दोलननियन्त्रण) आदेशः, त्रिसप्तत्यधिक ऊनविंशतिशतं इत्येतयोः अन्तर्गतं अधिसूचितं अस्ति। मन्त्री उक्तवान् यत् राज्यसर्वकारेभ्यः विशेषतः नेपाल, बाङ्गलादेश, म्यांमार सीमान्तेषु राज्यसर्वकारेभ्यः नियमितरूपेण अनुरोधः कृतः यत् ते सतर्कतां वर्धयन्तु यत् भारतात् समीपस्थदेशेषु यूरिया इत्यादीनां उर्वराणां तस्करीं न भवेदिति।

**रक्तवृन्तकम्**

अद्य सर्वकारेण उक्तं यत् सम्पूर्णे देशे टमाटरशाकस्य मूल्येषु वृद्धिः मूलभूत-याचना-आपूर्ति-असंतुलनस्य अथवा उत्पादन-न्यूनतायाः कारणैः न वर्तते अपितु अस्थायि-स्थानीय-कारकाणां कारणात् इयं वृद्धिः सञ्जाता अस्ति। उपभोक्तृकार्य-खाद्य-सार्वजनिक-वितरण-मन्त्रालयद्वारा सूचितं यत् जुलै-मासस्य अन्तिमसप्ताहाभ्यन्तरे देशस्य उत्तर-वायव्य-प्रदेशेषु प्रचण्डवृष्ट्या दिल्लीनगरे टमाटरशाकस्य मूल्यं त्रिसप्ततिः रूप्यकाणि यावत् प्रति किलोग्रामपरिमितं वर्धितम् इति।

## गडकरी-कॉन्क्लेव्

केन्द्रीयमार्गपरिवहनराजमार्गमन्त्रिणा नितिनगडकरिणा विश्वासः प्रकटितः यत् वर्षान्तं यावत् भारतस्य संसाधनव्ययः नवप्रतिशतं यावत् न्यूनीभविष्यति। अद्य नवदिल्ल्यां निजवार्तावाहिन्या आयोजिते सम्मेलने श्रीगडकरी एतत् अवदत्। सः एतस्याः न्यूनतायाः कारणं देशस्य मार्गसंरचनायां महत्त्वपूर्णं परिष्कारं वर्णितवान् । केन्द्रीयमन्त्री अवदत् यत् कृषि-संबद्धक्षेत्राणां वृद्धिः सर्वकारस्य प्राथमिकता अस्ति। सः अवदत् यत् अस्य क्षेत्रस्य वृद्धिः सकलराष्ट्रियउत्पादेषु महत्त्वपूर्णं योगदानं प्रदास्यति।

## इजरायल्-मन्त्रिमण्डल

इजरायल्-देशस्य सुरक्षा-मन्त्रिमण्डलेन प्रधानमन्त्रिणः बेञ्जामिन् नेतन्याहोः गाजा-नगरस्य अधिग्रहणस्य प्रस्तावः अनुमोदितः। मन्त्रिमण्डलेन गाजायां युद्धस्य समाप्त्यर्थं पञ्च सिद्धान्ताः अपि अनुमोदिताः, येषु हमासस्य निःशस्त्रीकरणं, सर्वेषां बन्धकानां जीवितानां मृतानां वा पुनरागमनं, गाजायाः विसैन्यीकरणं, सम्पूर्णगाजानगरे इजरायल्देशस्य सुरक्षा-नियन्त्रणम्, नागरिक-प्रशासनस्य स्थापना, यद्धि न हमासम् उत वा फिलीस्तीन-प्राधिकरणरहितं भविष्यति। आधिकारिकवक्तव्यानुसारि युद्धक्षेत्रात् बहिः नागरिकजनसङ्ख्यायै मानवीयसहाय्यं वितरत् सैन्यं गाजा-नगरस्य सम्पूर्णनियन्त्रणं कर्तुं सज्जतां करिष्यति इति।

## कनाडा-ओपन

टेनिस्-क्रीडायाम् अष्टादवर्षीयया कनाडा-देशस्य विक्टोरिया-म्बोको-इत्यनया नेशनल्-बैङ्क-ओपन-क्रीडायां नाओमी ओसाका द्वि-षड्, षड्-चत्वारि, षड्-एकं इति अङ्कान्तरालेन पराजिता ।

**।। इति वार्ता ।।**